Register Number:

Date:

**ST. JOSEPH'S UNIVERSITY BANGALORE-27**

**B.SC, B.A, B.COM & BBA - IV SEMESTER**

**SEMESTER EXAMINATION: MAY 2024**

**SA 421 – SAMSKRIT**

**Time- 2hrs** **Max Marks-60**

**I. समुचितम् उत्तरं लिखत।** **12×1=12**

1. मेनकायाः पुत्री का?
2. नाटकस्य नायकः कः?
3. शर्मिष्ठा का?
4. ओषधीनां पतिः कः?
5. कः शकुन्तलां शापं दत्तवान्?
6. शर्मिष्ठायाः पुत्रः कः?
7. शकुन्तलायाः वस्त्रं कः गृह्णाति?
8. हस्तिनापुरस्य राजा कः?
9. काश्यपस्य शिष्यः कः?
10. शर्मिष्ठायाः पिता कः?
11. अस्मिन् नाटके कति सर्गाः सन्ति?
12. शकुन्तलायै दत्त-पुष्पमालायाः नाम किम्?
13. हंसपादिका का?

**II. श्लोकयोः अन्वय-अन्वयार्थ-तात्पर्यं च लिखत।** **2×6=12**

14. अन्तर्हिते शशिनि सैव कुमुद्वती मे
    दृष्टिं न नन्दयति संस्मरणीयशोभा।
    इष्टप्रवासजनितान्यबलाजनस्य
    दुःखानि नूनमतिमात्रसुदुःसहानि॥

15. पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
    नादत्ते प्रियमण्डनामि भवतां स्नेहेन या पल्लवम्।
    आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
    सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

16. दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
    अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥

**III. सविस्तरं लिखत।** **2×10=20**

17. शुल्काध्यक्षस्य कर्तव्यानि अधिकृत्य लिखत।
18. अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्कस्य सारांशं लिखत।
19. पञ्चचम्पूकाव्यम् अधिकृत्य लिखत।

**IV. लघुटिप्पणीं लिखत।** **2×3=6**

20. आयव्ययलेख्यम्
21. पण्याध्यक्षः
22. कण्वमहर्षिः

**V. अनुच्छेदं पठित्वा उत्तरत।**

षट् कारणानि श्रियं विनाशयन्ति । प्रथमं कारणमस्ति असत्यम्। यः नरः असत्यं वदति, तस्य कोऽपि जनः विश्वासं न करोति । उक्तञ्च- 'सत्यं ब्रूयात्, प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम्।' निष्ठुरता अस्ति द्वितीयं कारणम्। कदापि केनादि सह निष्ठुरता (निर्दयता) न उचिता। सदैव जगति सर्वैः सह करुणा, दया नम्रता च करणीयाः। तृतीयं कारणम् अस्ति कृतघ्नता। जीवने अनेके जनाः अस्मान् उपकुर्वन्ति । प्रायः जनाः उपकारिणं

विस्मरन्ति, प्रत्युपकारं न कुर्वन्ति। एतादृशः स्वभावः कृतघ्नता इति उच्यते। आलस्यम् अपरः महान् दोषः, 'आलस्यं हि मनुष्याणां शरीरस्थः महारिपुः। अहङ्कारः मनुष्यस्य मतिं नाशयति। अहङ्कारी मनुष्यः सर्वदा आत्मप्रशंसाम् एव करोति। न कदापि कस्यचित् उपकारं करोति। व्यसनानि अपि श्रियं हरन्ति। ये मद्यपानं कुर्वन्ति तेषाम् आत्मिकबलम्, बुद्धिबलं शारीरिकबलं च नश्यन्ति। अतः बुद्धिमान् एतान् दोषान् सर्वथा त्यजेत्।

23. कीदृशं सत्यं न ब्रूयात्? **5×2=10**

24. मनुष्याणां शरीरस्थः महान् रिपुः कः?

25. अहङ्कारी मनुष्यः किं करोति?

26. तृतीयं कारणं किम् उच्यते?

27. अस्य अनुच्छेदस्य समीचीनं शीर्षकं लिखत।